## ब्रुवः पञ्चानामादित आहो ब्रुवः । (८४/२४५०)

परस्मैपदानाम् इत्येव, [1]लटो वा इति च । ब्रुवः परस्य लटः [2]परस्मैपदानां पञ्चानामादिभूतानां पञ्चैव णलादय आदेशा भवन्ति[3], तत्सन्नियोगेन च ब्रुव आहशब्द आदेशो भवति । आह, आहतुः, आहुः । आत्थ, आहथुः । न च भवति । ब्रवीति, [4]ब्रूतः, ब्रुवन्ति । ब्रवीषि, ब्रूथः । पञ्चानाम् इति किम्? ब्रूथ । ब्रवीमि, ब्रूवः, ब्रूमः । आदितः इति किम्? परेषां मा भूत् । ब्रुवः इति पुनर्वचनं स्थान्यर्थम्, परस्मैपदानामेव [5]हि स्यात् ॥

## लोटो लङ्वत् । (८५/२१९८)

अतिदेशोऽयम् । लोटो [6]लङ्वत् कार्यं भवति । तामादयः, सलोपश्च । पचताम् । पचतम् । पचत । पचाव । पचाम । अडाटौ कस्मान्न भवतः, तथा झेर्जुसादेशः (३.४.१०८/२२१३) 'लङः शाकटायनस्यैव' (३. ४. १११/२४६३) इति वान्तु, यान्तु? 'विदो लटो वा' (३. ४.८३/२४६४) इत्यतो वाग्रहणमनुवर्तते, सा च व्यवस्थितविभाषा भविष्यति ॥

## एरुः । (८६/२१९६)

लोटः इत्येव । लोडादेशानामिकारस्य उकारादेशो भवति । पचतु । पचन्तु ।

[३३४] हिन्योरुत्वप्रतिषेधो वक्तव्यः । (म.भा.२.१८५)

[7]न वा उच्चारणसामर्थ्यात् । अथ वा वा इति वर्तते, सा च व्यवस्थितविभाषा[8] ॥

## सेर्ह्यपिच्च । (८७/२२०१)

[9]लोटः इत्येव । लोडादेशस्य सेः [10]हि इत्ययमादेशो भवति, [11]अपिच्च भवति । स्थानिवद्भावात् पित्त्वं प्राप्तं प्रतिषिध्यते । लुनीहि । [12]पुनीहि । राध्नुहि । तक्ष्णुहि ॥

## वा छन्दसि । (८८/३५५२)

अपित्त्वं विकल्प्यते । लादेशः छन्दसि विषये [13]हिशब्दो वा अपिद् भवति । 'युयोध्यस्मज्जुहुराणमेनः' (ऋ. १.१८९. १) । [14]प्रीणाहि । [15]प्रीणीहि (काठ.सं. ४०.१२) ॥

## मेर्निः । (८९/२२०३)

[16]लोटः इत्येव । लोडादेशस्य मेः [17]निः आदेशो भवति । उत्वलोपयोरपवादः । [18]पचानि । पठानि ॥

---

1. लट इति च ह. 2. आदेशानाम् परस्मैपदसञ्ज्ञकानाम् फ. 3. स्थानिसम्बन्धादादेशेऽपि पञ्चत्वमादित्वं च विज्ञायते इत्यधिकम् अ. ब. क. फ. 4. ब्रूतः नास्ति फ. 5. हि नास्ति फ. 6. लङ इव फ. 7. लुनीहि पचानि इत्यधिकम् ह. 8. भविष्यति इत्यधिकम् क. 9. वाक्यमिदं नास्ति फ. 10. हिशब्दः अ. 11. अपित् सः फ. 12. पुनीहि नास्ति फ. 13. हिशब्दादेशः फ. 14. न च भवति इत्यधिकम् फ. 15. हव्यं इत्यधिकम् फ. 16. वाक्यमिदं नास्ति फ. 17. निशब्दः ब. ह. 18. पचानि नास्ति फ.